## तेनैकदिक्। (११२/१४९२)

तेन इति तृतीयासमर्थाद् एकदिक् इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। एकदिक् [1]तुल्यदिक् समानदिक् इत्यर्थः। सुदाम्ना एकदिक् सौदामनी विद्युत्। हैमवती। [2]त्रैककुदी। पैलुमूली। तेन इति प्रकृते पुनः समर्थविभक्तिग्रहणं छन्दोऽधिकारनिवृत्त्यर्थम्। [3]पूर्वत्र [4]हि छन्दोऽधिकारात् तद्विषयता साध्यते॥

## तसिश्च। (११३/१४९३)

तसिश्च[5] प्रत्ययो भवति तेनैकदिक् इत्येतस्मिन् [6]विषये। पूर्वेण घादिषु अणादिषु च प्राप्तेषु [7]अयमपरः प्रत्ययो विधीयते। स्वरादिपाठाद[8] व्ययत्वम्। सुदामतः। हिमवत्तः[9]। [10]पिलुमूलतः॥

## उरसो यच्च। (११४/१४९४)

उरस्शब्दात् यत् प्रत्ययो भवति, चकारात् तसिश्च, तेन एकदिक् इत्येतस्मिन् [11]विषये। अणोऽपवादः। उरसा [12]एकदिग् उरस्यः, उरस्तः॥

## उपज्ञाते। (११५/१४९५)

तेन इत्येव[13]। तृतीयासमर्थात् उपज्ञाते इत्येतस्मिन् [14]विषये यथाविहितं प्रत्ययो भवति[15]। विना उपदेशेन ज्ञातमुपज्ञातं, स्वयम[16]भिसम्बद्धमित्यर्थः। पाणिनिना [17]उपज्ञातं पाणिनीयमकालकं व्याकरणम्। काशकृत्स्नं गुरुलाघवम्। आपिशलं दुष्करणम्॥

## कृते ग्रन्थे। (११६/१४९६)

तेन इत्येव[18]। तृतीयासमर्थात् कृते इत्येतस्मिन्नर्थे[19] यथाविहितं प्रत्ययो भवति, यत् तत्कृतं ग्रन्थश्चेत् स भवति। वररुचिना कृताः वाररुचाः श्लोकाः। [20]हैकुपादो ग्रन्थः। [21]भैकुराटो ग्रन्थः। जालूकः[22]। ग्रन्थे इति किम्? [23]तक्षकृतः प्रासादः। उत्पादितं कृतं, विद्यमानमेव ज्ञातमुपज्ञातम् इत्ययमनयोर्विशेषः॥

## सञ्ज्ञायाम्। (११७/१४९७)

[24]तृतीयासमर्थात् कृते इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति समुदायेन चेत् सञ्ज्ञा [25]ज्ञायते। मक्षिकाभि कृतं माक्षिकम्। [26]कार्मुकम्। सारघम्। पौत्तिकम्। मधुनः सञ्ज्ञाः [27]एताः॥

---

1. तुल्यदिक् नास्ति फ. 2. त्रैकुटी, पैलुमाली ड, त्रैककुम्भि बैलुमूली ह. 3. पूर्वसूत्रे ह. 4. हि नास्ति फ. 5. च नास्ति फ. 6. अर्थे फ. 7. अयमपवादप्रत्ययः फ, अयं तसिप्रत्ययः ह. 8. अव्ययम् फ. ब. 9. त्रिककुत्तः इत्यधिकम् फ. 10. पीलुमूलतः ब.क.इ, पीलुमालतः ड. 11. अर्थे फ.ह. 12. एका दिक् ह. 13. एव नास्ति फ.ह. 14. अर्थे फ.ह. 15. अणोऽपवादः इत्यधिकम् ब. 16. अभिसंबुद्धम् ब, अभिसंबुध्यते क. 17. एव इत्यधिकम् ह. 18. एव नास्ति फ. 19. विषये इ. 20. हैरुसतः फ, हैकपादः ब.इ. 21. बैकुराटः ड, नास्ति फ. 22. ग्रन्थः इत्यधिकम् ब.क. 23. तक्ष्णा कृतः ब.क.इ.फ. 24. तेन इत्यधिकम् ड.फ. 25. गम्यते ब.क.ड.इ.फ.ह. 26. गार्मुतम् ब.ड, कार्मुतम् फ, नास्ति ह. 27. एताः नास्ति ड.